# गृहिण्योः सम्भाषणम् - I

तृतीया विभक्तिः

मालती - शारदे । किं करोती ?

शारदा - अहो मासति । आगच्छतु, उपविशतु कुशलिनी किम् ?

मालती - आम्, सर्वं कुशलम् । भवती स्वकार्यं करोतु । अहं तत्रैव अन्तः आगच्छामि ।

शारदा - मम पाकः न समाप्तः । अद्य भोजनार्थं बान्धवाः आगच्छन्ति । अतः विशेषपाकः ।

मालती - तर्हि किं किं करोति ?

शारदा - आलुकेन क्वथितं करोमि । कूष्माण्डेन तेमनं करोमि ।

मालती - बहु मरीचिकाः सन्ति खलु ? मरीचिकया किं करोति ?

शारदा - लघु मरीचिका कटुः महामरीचिकया भजं करोमि ।

मालती - कैः व्यञ्जनं करोति ?

शारदा - विण्डीनकैः व्यञ्जनं करोमि । उर्वारुकेण 'किं करोमि' इति चिन्तयामि ।

मालती - उर्वारुकं गृञ्जनकं च योजयित्वा कोषम्भरीं करोतु भोः । बहु स्वादिष्टं भवति ।

शारदा - तथैव करोमि । पायसमपि करोमि । पर्पटान् अपि भर्जयामि । मम पतिः बहु इच्छति ।

मालति - अहमपि किञ्चित् साहाय्यं करोमि ।

शारदा - मास्तु भो। भवती उपविशतु मया सह सम्भाषणं करोतु । अहं सर्वं करोति ।

मालती - तर्हि अहं सर्वेषां रुचिं पश्यामि । सर्वं भवती करोतु ।